# सुन्दरकाण्ड चतुर्दशः सर्गः (१४) -॥ अशोकवनं अन्वेषणम् ॥

स मुहूर्त मिव ध्यात्वा मनसा चाधिगम्य ताम् ।
अवप्लुतो महातेजाः प्राकारं तस्य वेश्मनः ॥ १ ॥

स तु संहृष्ट सर्वाङ्गः प्राकारस्थो महाकपिः ।
पुष्पिताग्रान् वसन्तादौ ददर्श विविधान् द्रुमान् ॥ २ ॥

सालान शोकान् भव्यांश्च चम्पकांश्च सुपुष्पितान् ।
उद्दालकान् नाग वृक्षांश् चूतान् कपि मुखानपि ॥ ३ ॥

अथाम्रवण सञ्छन्नां लता शत समावृताम् ।
ज्यामुक्त इव नाराचः पुप्लुवे वृक्ष वाटिकाम् ॥ ४ ॥

स प्रविश्य विचित्रां तां विहगै रभिनादिताम् ।
राजतैः काञ्चनैश् चैव पादपैः सर्वतो वृताम् ॥ ५ ॥

विहगै र्मृग सङ्घैश्च विचित्रां चित्र काननाम् ।
उदितादित्य सङ्काशां ददर्श हनुमान् कपिः ॥ ६ ॥

वृतां नानाविधैर् वृक्षैः पुष्पोपग फलोपगैः ।
कोकिलैर् भृङ्ग राजैश्च मत्तैर् नित्य निषेविताम् ॥ ७ ॥

प्रहृष्ट मनुजे काले मृग पक्षि समाकुले ।
मत्त बर्हिण सङ्घुष्टां नाना द्विज गणायुताम् ॥ ८ ॥

मार्गमाणो वरारोहां राजपुत्री मनिन्दिताम् ।
सुख प्रसुप्तान् विहगान् बोधयामास वानरः ॥ ९ ॥

उत्पतद्भिर् द्विर्जगणैः पक्षैः सालाः समाहताः ।
अनेक वर्णा विविधा मुमुचुः पुष्प वृष्टयः ॥ १० ॥

पुष्पावकीर्णः शुशुभे हनुमान् मारुतात्मजः ।
अशोक वनिका मध्ये यथा पुष्पमयो गिरिः ॥ ११ ॥

दिशः सर्वाः प्रधावन्तं वृक्ष षण्डगतं कपिम् ।
दृष्ट्वा सर्वाणि भूतानि वसन्त इति मेनिरे ॥ १२ ॥

वृक्षेभ्यः पतितैः पुष्पै रवकीर्णा पृथग्विधैः ।
रराज वसुधा तत्र प्रमदेव विभूषिता ॥ १३ ॥

तरस्विना ते तरवस् तरसाभि प्रकम्पिताः ।
कुसुमानि विचित्राणि ससृजुः कपिना तदा ॥ १४ ॥

निर्धूत पत्र शिखराः शीर्ण पुष्प फल द्रुमाः ।
निक्षिप्त वस्त्राभरणा धूर्ता इव पराजिताः ॥ १५ ॥

हनूमता वेगवता कम्पितास्ते नगोत्तमाः ।
पुष्प पर्ण फलान्याशु मुमुचुः पुष्पशालिनः ॥ १६ ॥

विहङ्ग सङ्घैर् हीनास्ते स्कन्ध मात्राश्रया द्रुमाः ।
बभूवु रगमाः सर्वे मारुते नेव निर्धुताः ॥ १७ ॥

निर्धूत केशी युवतिर् यथा मृदित वर्णका ।
निष्पीत शुभ दन्तोष्ठी नखैर् दन्तैश्च विक्षता ॥ १८ ॥

तथा लाङ्गूल हस्तैश्च चरणाभ्यां च मर्दिता ।
बभूवाशोक वनिका प्रभग्न वर पादपा ॥ १९ ॥

महा लतानां दामानि व्यधमत् तरसा कपिः ।
यथा प्रावृषि विन्ध्यस्य मेघजालानि मारुतः ॥ २० ॥

स तत्र मणि भूमीश्च राजतीश्च मनोरमाः ।
तथा काञ्चन भूमीश्च ददर्श विचरन् कपिः ॥ २१ ॥

वापीश्च विविधा काराः पूर्णाः परम वारिणा ।
महार्हैर् मणिसोपानै रुपपन्नास् ततस् ततः ॥ २२ ॥

मुक्ता प्रवाल सिकताः स्फाटिकान्तर कुट्टिमाः ।
काञ्चनैस् तरुभिश् चित्रैस् तीरजै रुपशोभिताः ॥ २३ ॥

फुल्ल पद्मोत् पलवनाश् चक्रवाकोप कूजिताः ।
नत्यूहरुत सङ्घुष्टा हंस सारस नादिताः ॥ २४ ॥

दीर्घाभिर् द्रुम युक्ताभिः सरिद्भिश्च समन्ततः ।
अमृतोपम तोयाभिः शिवाभि रुप संस्कृताः ॥ २५ ॥

लता शतै रवतताः सन्तान कुसुमा वृताः ।
नाना गुल्मावृत घनाः करवीर कृतान्तराः ॥ २६ ॥

ततोऽम्बुधर सङ्काशं प्रवृद्ध शिखरं गिरिम् ।
विचित्र कूटं कूटैश्च सर्वतः परिवारितम् ॥ २७ ॥

शिला गृहै रवततं नाना वृक्षैः समाकुलम् । [समावृतम्]
ददर्श हरि शार्दूलो रम्यं जगति पर्वतम् ॥ २८ ॥

ददर्श च नगात् तस्मान् नदीं निपतितां कपिः ।
अङ्कादिव समुत्पत्य प्रियस्य पतितां प्रियाम् ॥ २९ ॥

जले निपति ताग्रैश्च पादपै रुप शोभिताम् ।
वार्यमाणा मिव क्रुद्धां प्रमदां प्रिय बन्धुभिः ॥ ३० ॥

पुनरा वृत्त तोयां च ददर्श स महाकपिः ।
प्रसन्नामिव कान्तस्य कान्तां पुन रुपस्थिताम् ॥ ३१ ॥

तस्यादूरात् स पद्मिन्यो नाना द्विज गणायुताः । [-स]
ददर्श हरि शार्दूलो हनुमान् मारुतात्मजः ॥ ३२ ॥

कृत्रिमां दीर्घिकां चापि पूर्णां शीतेन वारिणा ।
मणिप्रवर सोपानां मुक्ता सिकत शोभिताम् ॥ ३३ ॥

विविधै र्मृग सङ्घैश्च विचित्रां चित्र काननाम् ।
प्रासादैः सुमहद्भिश्च निर्मितैर् विश्वकर्मणा ॥ ३४ ॥

काननैः कृत्रिमैश् चापि सर्वतः समलङ्कृताम् ।
ये केचित् पादपास्तत्र पुष्पोपग फलोपगाः ॥ ३५ ॥

सच्छत्राः सवितर्दीकाः सर्वे सौवर्ण वेदिकाः ।
लता प्रतानैर् बहुभिः पर्णैश्च बहुभिर् वृताम् ॥ ३६ ॥

काञ्चनीं शिंशुपा मेकां ददर्श हनुमान् कपिः ।
वृतां हेम मयीभिस्तु वेदिकाभिः समन्ततः ॥ ३७ ॥

सोऽपश्यद् भूमि भागांश्च गर्त प्रस्रवणानि च ।
सुवर्ण वृक्षा नपरान् ददर्श शिखि सन्निभान् ॥ ३८ ॥

तेषां द्रुमाणां प्रभया मेरोरिव दिवाकरः ।
अमन्यत तदा वीरः काञ्चनोऽस्मीति वानरः ॥ ३९ ॥

तां काञ्चनैस् तरुगणै र्मारुतेन च वीजिताम् ।
किङ्किणी शत निर्घोषां दृष्ट्वा विस्मय मागमत् ॥ ४० ॥

स पुष्पिताग्रां रुचिरां तरुणाङ्कुर पल्लवाम् ।
तामारुह्य महाबाहुः शिंशुपां पर्ण संवृताम् ॥ ४१ ॥

इतो द्रक्ष्यामि वैदेहीं राम दर्शन लालसाम् ।
इतश्चेतश्च दुःखार्तां सम्पतन्तीं यदृच्छया ॥ ४२ ॥

अशोक वनिका चेयं दृढं रम्या दुरात्मनः ।
चम्पकैश् चन्दनैश्चापि वकुलैश्च विभूषिता ॥ ४३ ॥

इयं च नलिनी रम्या द्विज सङ्घ निषेविता ।
इमां सा राम महिषी नून मेष्यति जानकी ॥ ४४ ॥

सा रामा राम महिषी राघवस्य प्रिया सती ।
वन सञ्चार कुशला नून मेष्यति जानकी ॥ ४५ ॥

अथवा मृग शाबाक्षी वनस्यास्य विचक्षणा ।
वनमेष्यति सार्येह राम चिन्तानुकर्शिता ॥ ४६ ॥

राम शोकाभि सन्तप्ता सा देवी वाम लोचना ।
वनवासे रता नित्य मेष्यते वन चारिणी ॥ ४७ ॥

वने चराणां सततं नूनं स्पृहयते पुरा ।
रामस्य दयिता भार्या जनकस्य सुता सती ॥ ४८ ॥

सन्ध्याकाल मनाः श्यामा ध्रुव मेष्यति जानकी ।
नदीं चेमां शिव जलां सन्ध्यार्थे वर वर्णिनी ॥ ४९ ॥

तस्याश् चाप्यनु रूपेय मशोक वनिका शुभा ।
शुभा या पार्थिवेन्द्रस्य पत्नी रामस्य सम्मता ॥ ५० ॥

यदि जीवति सा देवी ताराधिप निभानना ।
आगमिष्यति साऽवश्य मिमां शिव जलां नदीम् ॥ ५१ ॥

एवं तु मत्वा हनुमान् महात्मा
प्रतीक्षमाणो मनुजेन्द्र पत्नीम् ।
अवेक्षमाणश्च ददर्श सर्वं
सुपुष्पिते पर्ण घने निलीनः ॥ ५२ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे चतुर्दशः सर्गः ॥ १४ ॥